[1]बीजरुहाकुर्वन्, प्राजरुहाकुर्वन्, रोपणा-रोहणा, आरुरुक्षा, रोरुहा;
रोहणम्, रोपणम्-रोहणम्, रुरुक्षणम्, रोरुहणम्;
रूढ्वा, रोपयित्वा-रोहयित्वा, रुरुक्षित्वा, रोरुहित्वा;
आरुह्य, आरोप्य-आरोह्य, आरुरुक्ष्य, आरोरुह्य;
रोहम् २, } रोपम् २-रोहम् २, } रुरुक्षम् २, } रोरुहम् २; }
रूढ्वा २, } रोपयित्वा २-रोहयित्वा २, } रुरुक्षित्वा २, } रोरुहित्वा २; }
[2]रोहिः, [3]रोहित्, [4]रोहितः-लोहितः, [5]रौहिषः ।

(1433) " रूक्ष पारुष्ये " (X-चुरादिः-1910. अक. सेट्. उभ)

अदन्तः ।

**मा. धा. वृत्तौ 'रुक्षति इति शपि' इति दर्शनात् भ्वादौ 'रुक्ष' इति धातुः पूर्वं स्यात्, अधुना भ्रष्टः इति ज्ञायते ।**

रूक्षकः-क्षिका, रुरूक्षयिषकः-षिका, रूक्षयिता-त्री, रुरूक्षयिषिता-त्री; इत्यादीनि रूपाणि सर्वाणि चौरादिकचूर्णयतिवत् (550) बोध्यानि । युचि रूक्षणा[A] इति ।

---

1. बीजं रोहयतीत्यर्थे अन्तर्भावितण्यर्थादस्मात् मूलविभुजादित्वात् (वा. 3-2-5) कर्तरि कप्रत्ययः । तदन्तात् स्त्रियां टापि **बीजरुहा** इति सम्पद्यते । साक्षात्-प्रभृतिषु (1-4-74) गणे **बीजरुहा** इति पाठादस्य कृञो योगे गतिसंज्ञा । 'ते प्राग् धातोः' (1-4-80) इति धातोः पूर्वमस्य प्रयोगः । **'कुगतिप्रादयः'** (2-2-18) इति समासः । **बीजरुहाकुर्वन्**=केशाः छिन्नाः पुना रोहयन् इत्यर्थः । एवं **प्राजरुहाकुर्वन्** इत्यत्रापि बोध्यम् ।
2. **'हृपिशिरुहि—'** [द. उ. 1-47] इतीन्प्रत्ययः । रोहतीति **रोहिः**=जन्म ।
3. **'हसरुहि—'** [द. उ. 6-3] इतीतिप्रत्ययः । **रोहित्**=वीरुत्प्रकारः, सूर्योऽमिश्च ।
4. **'रुहे रश्च लो वा'** [द. उ. 6-13] इतीतन्प्रत्ययः, रेफस्य लकारश्च वा भवति ।
5. **'रुहेर्वृद्धिश्च'** [द. उ. 9. 4] इति टिषच्प्रत्यये धातोर्वृद्धौ च **रौहिषः** इति भवति । **रौहिषः**=तृणजातिः, स्त्रियां षित्त्वात् ङीषि **रौहिषी**=दूर्वा ।

A. '........मोमूत्रितारिरति**रूक्षणया** रणेषु ।' धा. का. 3. 59.